त्संतं। आ। मिनत्॥ १७॥ ॥ सः। वीरः। अप्रतिऽस्कुतः। इंद्रेण। शूशुवे। नृऽभिः। यः। ते। गभीरा। सवनानि। वृत्रऽहन्। सुनोति। आ। च। धावति। भव। वरूथं। मघऽवन् शिव २०

न्। मघोनां। यत्। संऽअजासि। शर्धतः। वि। त्वाऽहतस्य। वेदनं। भजेमहि। आ। दुःऽनशः। भर। गयं॥ सुनोत। सोमऽपाव्ने। सोमं। इंद्राय। वज्रिणे। पचत। पक्तीः। अवसे। कृणुध्वं। इत्।
पृणन्। इत्। पृणते। मयः॥ मा। स्रेधत। सोमिनः। दक्षत। महे। कृणुध्वं। राये। आऽतुजे॥ तरणिः। इत्। जयति। क्षेति। पुष्यति। न। देवासः। कवत्नवे॥ नकिः। सुऽदासः। रथं। परि। आस।
न। रीरमत्। इंद्रः। यस्य। अविता। यस्य। मरुतः। गमत्। सः। गोऽमति। व्रजे॥ १८॥ ॥ गमत्। वाजं। वाजयन्। इंद्र। मर्त्यः। यस्य। त्वं। अविता। भुवः। रथानां। अस्माकं। शूर। नृणां। उत्।
इत्। नु। अस्य। रिच्यते। अंशः। धनं। न। जिग्युषः। यः। इंद्रः। हरिऽवान्। न। दभंति। तं। रिपः। दक्षं। दधाति। सोमिनि॥ मंत्रं। अखर्वं। सुऽधितं। सुऽपेशसं। दधात। यज्ञियेषु। आ। पूर्वीः। च
चन। प्रऽसितयः। तरंति। तं। यः। इंद्रे। कर्मणा। भुवत्॥ कः। तं। इंद्र। त्वाऽवसुं। आ। मर्त्यः। दधर्षति। श्रद्धा। इत्। ते। मघऽवन्। पार्ये। दिवि। वाजी। वाजं। सिसासति॥ मघोनः। स्म। वृत्रऽ
हत्येषु। चोदय। ये। ददति। प्रिया। वसु। तव। प्रऽनीती। हरिऽअश्व। सूरिऽभिः। विश्वा। तरेम। दुःऽइता॥ १९॥ ॥ तव। इत्। इंद्र। अवमं। वसु। त्वं। पुष्यसि। मध्यमं। सत्रा। वि
श्वस्य। परमस्य। राजसि। नकिः। त्वा। गोषु। वृण्वते॥ त्वं। विश्वस्य। धनऽदाः। असि। श्रुतः। ये। ईं। भवंति। आजयः। तव। अयं। विश्वः। पुरुऽहूत। पार्थिवः। अवस्युः। नाम।
भिक्षते। यत्। इंद्र। यावतः। त्वं। एतावत्। अहं। ईशीय। स्तोतारं। इत्। दिधिषेय। रदवसो इति रदऽवसो। न। पापऽत्वाय। रासीय॥ शिक्षेयं। इत्। महऽयते। दिवेऽदिवे। रा
यः। आ। कुहचित्ऽविदे। नहि। त्वत्। अन्यत्। मघऽवन्। नः। आप्यं। वस्यः। अस्ति। पिता। चन॥ तरणिः। इत्। सिसासति। वाजं। पुरंऽध्या। युजा। आ। वः। इंद्रं। पुरुऽहूतं। नमे॥

१ नेमिं॥

प पंचमा

गिरा। तिष्ठाःऽइव। स्कंऽ दुं॥ २०॥ न। दुःऽस्तुती। मर्त्यः। विंदते। वसु। न। स्रेधंतं। रयिः। नशत्। सुऽशक्तिः। इत्। मघऽवन्। तुभ्यं। माऽवते। देष्णं। यत्। पार्ये। दिवि। अभि। त्वा। शूर।
२९ नोनुमः। अदुग्धाःऽइव। धेनवः। ईशानं। अस्य। जगतः। स्वःऽदृशं। ईशानं। इंद्र। तस्थुषः। न। त्वाऽवान्। अन्यः। दिव्यः। न। पार्थिवः। न। जातः। न। जनिष्यते। अश्वऽयंतः। मघऽवन्।
इंद्र। वाजिनः। गव्यंतः। त्वा। हवामहे। अभि। सतः। तत्। आ। भर। इंद्र। ज्यायः। कनीयसः। पुरुऽवसुः। हि। मघऽवन्। सनात्। असि। भरेऽभरे। च। हव्यः। परा। नुदस्व। मघऽवन्।
अमित्रान्। सुऽवेदा। नः। वसु। कृधि। भव। वृधः। सखीनां। इंद्र। क्रतुं। नः। आ। भर। पिता। पुत्रेभ्यः। यथा। शिक्ष। नः। अस्मिन्। पुरुऽहूत। यामनि। जीवाः। ज्योतिः। अशी
महि। मा। नः। अज्ञाताः। वृजनाः। दुःऽआध्यः। मा। अशिवासः। अव। क्रमुः। त्वया। वयं। प्रऽवतः। शश्वतीः। अपः। अति। शूर। तरामसि॥ २६॥ ॥ श्वित्यंचः। मा। दक्षिणतःऽ
कपर्दाः। धियंऽजिन्वासः। अभि। हि। प्रऽमंदुः। उत्ऽतिष्ठन्। वोचे। परि। बर्हिषः। नॄन्। न। मे। दूरात्। अवितवे। वसिष्ठाः। दूरात्। इंद्रं। अनयन्। आ। सुतेन। तिरः। वैशंतं। अति। पां
तं। उग्रं। पाशऽद्युम्नस्य। वायतस्य। सोमात्। सुतात्। इंद्रः। अवृणीत। वसिष्ठान्। एव। इत्। नु। कं। सिंधुं। एभिः। ततार। भेदं। एभिः। जघान। दाशऽराज्ञे। सुदा
सं। प्र। आवत्। इंद्रः। ब्रह्मणा। वः। वसिष्ठाः। जुष्टी। नरः। ब्रह्मणा। वः। पितॄणां। अक्षं। अव्ययं। न। किल। रिषाथ। यत्। शक्वरीषु। बृहता। रवेण। इंद्रे। शुष्मं। अदधात। वसिष्ठाः।
उत्। द्यांऽइव। इत्। तृष्णऽजः। नाथितासः। अदीधयुः। दाशऽराज्ञे। वृतासः। वसिष्ठस्य। स्तुवतः। इंद्रः। अश्रोत्। उरुं। तृत्सुऽभ्यः। अकृणोत्। ऊं इति। लोकं॥ ॥ २९

दंडाःऽइव। इत्। गोऽअजनासः। आसन्। परिऽछिन्नाः। भरताः। अर्भकासः। अभवत्। च। पुरःऽएता। वसिष्ठः। आत्। इत्। तृत्सूनां। विशः। अप्रथंत। त्रयः। कृण्वंति। भुव
नेषु। रेतः। तिस्रः। प्रऽजाः। आर्याः। ज्योतिःऽअग्राः। त्रयः। घर्मासः। उषसं। सचंते। सर्वान्। इत्। तान्। अनु। विदुः। वसिष्ठाः। सूर्यस्यऽइव। वक्षथः। ज्योतिः। एषां। समुद्रस्यऽइव।
महिमा। गभीरः। वातस्यऽइव। प्रऽजवः। न। अन्येन। स्तोमः। वसिष्ठाः। अनुऽएतवे। वः। ते। इत्। निण्यं। हृदयस्य। प्रऽकेतैः। सहस्रऽवल्शं। अभि। सं। चरंति। यमेन। ततं। परिऽधिं। वयं
तः। अप्सरसः। उप। सेदुः। वसिष्ठाः। विऽद्युतः। ज्योतिः। परि। संऽजिहानं। मित्रावरुणा। यत्। अपश्यतां। त्वा। तत्। ते। जन्म। उत। एकं। वसिष्ठ। अगस्त्यः। यत्। त्वा। विशः। आऽजभार॥
२९ उत। असि। मैत्रावरुणः। वसिष्ठ। उर्वश्याः। ब्रह्मन्। मनसः। अधि। जातः। द्रप्सं। स्कन्नं। ब्रह्मणा। दैव्येन। विश्वे। देवाः। पुष्करे। त्वा। अददंत। सः। प्रऽकेतः। उभयस्य। प्रऽवि
द्वान्। सहस्रऽदानः। उत। वा। सऽदानः। यमेन। ततं। परिऽधिं। वयिष्यन्। अप्सरसः। परि। जज्ञे। वसिष्ठः। सत्रे। ह। जातौ। इषिता। नमःऽभिः। कुंभे। रेतः। सिसिचतुः। समानं। ततः। ह। मानः। उत्।
इयाय। मध्यात्। ततः। जातं। ऋषिं। आहुः। वसिष्ठं। उक्थऽभृतं। सामऽभृतं। बिभर्ति। ग्रावाणं। बिभ्रत्। प्र। वदाति। अग्रे। उप। एनं। आध्वं। सुऽमनस्यमानाः। आ। वः। गच्छाति। प्रऽ
तृदः। वसिष्ठः॥ १४॥ ॥ प्र। शुक्रा। एतु। देवी। मनीषा। अस्मत्। सुऽतष्टः। रथः। न। वाजी। विदुः। पृथिव्याः। दिवः। जनित्रं। शृण्वंति। आपः। अधः। क्षरंतीः। आपः। चित्। अस्मै। पिन्वंत।
पृथ्वीः। वृत्रेषु। शूराः। मंसंते। उग्राः। आ। धूःऽसु। अस्मै। दधात। अश्वान्। इंद्रः। न। वज्री। हिरण्यऽबाहुः। अभि। प्र। स्थात। अहाऽइव। यज्ञं। याताऽइव। पत्मन्। त्मना। हिनोत। आ

प॰ पंचमाष्ट॰

२२ नः। समत्ऽसु। हिनोत। यज्ञं। दधात। केतुं। जनाय। वीरं। उत्। अस्य। शुष्मात्। भानुः। न। आर्त। बिभर्ति। भारं। पृथिवी। न। भूम। ह्वयामि। देवान्। अयातुः। अग्ने। साधन्। ऋतेन।
धियं। दधामि। अभि। वः। देवीं। धियं। दधिध्वं। प्र। वः। देवऽत्रा। वाचं। कृणुध्वं। आ। चष्टे। आसां। पाथः। नदीनां। वरुणः। उग्रः। सहस्रऽचक्षाः॥ [illegible]॥ ॥राजा। राष्ट्रानां। पेशः। न
दीनां। अनुत्तं। अस्मै। क्षत्रं। विश्वऽआयु। अविष्टेइति। अस्मान्। विश्वासु। विक्षु। अद्वेषं। कृणोत। शंसं। निनित्सोः। वि। एतु। दिद्युत्। द्विषः। अशेवाः। युयोत। विष्वक्। एनः। तनूनां।
अवीत्। नः। अग्निः। हव्यऽअत्। नमःऽभिः। प्रेष्ठः। अस्मै। अधायि। स्तोमः। सऽजूः। देवेभिः। अपां। नपातं। सखायं। कृध्वं। शिवः। नः। अस्तु। अब्जऽउक्थैः। अहिं। गृणीषे। बु
ध्ने। नदीनां। रजःऽसु। सीदन्। [illegible]। मा। यज्ञः। अस्य। स्रिधत्। ऋतऽयोः। उत। नः। एषु। नृषु। श्रवः। धुः। प्र। राये। यंतु। शर्धंतः। अर्यः। तपंति। शत्रुं। स्वः। न। भूम। महाःऽसे
नासः। अमेभिः। एषां। आ। यत्। नः। पत्नीः। गमंति। अच्छ। त्वष्टा। सुऽपाणिः। दधातु। वीरान्॥ २२॥ ॥प्रति। नः। स्तोमं। त्वष्टा। जुषेत। स्यात्। अस्मेइति। अरमतिः। वसुऽयुः। ता
नः। रासन्। रातिऽसाचः। वसूनि। [illegible]। वरूत्रीभिः। सुऽशरणः। नः। अस्तु। त्वष्टा। सुऽदत्रः। वि। दधातु। रायः। तत्। नः। रायः। पर्वताः। तत्। नः। आपः। तत्। रातिऽसाचः। ओ
षधीः। उत। द्यौः। वनस्पतिऽभिः। पृथिवी। सऽजोषाः। उभेइति। रोदसीइति। परि। पासतः। नः। अनु। तत्। उर्वीइति। रोदसीइति। जिहातां। अनु। द्युक्षः। वरुणः। इंद्रऽस
खा। अनु। विश्वे। मरुतः। ये। सहासः। रायः। स्याम। धरुणं। धियध्यै। तत्। नः। इंद्रः। वरुणः। मित्रः। अग्निः। आपः। ओषधीः। वनिनः। जुषंत। शर्मन्। स्याम। मरुतां। उपऽ २२

३ सु ३

स्थे॥ २५॥ ॥शं। नः। इंद्राग्नीइति। भवतां। अवःऽभिः। शं। नः। इंद्रावरुणा। रातऽहव्या। शं। इंद्रासोमा। सुविताय। शं। योः। शं। नः। इंद्रापूषणा। वाजऽसातौ। शं। न
भगः। शं। ऊंइति। नः। शंसः। अस्तु। शं। नः। पुरंऽधिः। शं। ऊंइति। संतु। रायः। शं। नः। सत्यस्य। सुऽयमस्य। शंसः। शं। नः। अर्यमा। पुरुऽजातः। अस्तु। शं। नः। धाता। शं। ऊंइति। ध
र्ता। नः। अस्तु। शं। नः। उरूची। भवतु। स्वधाभिः। शं। रोदसीइति। बृहतीइति। शं। नः। अद्रिः। शं। नः। देवानां। सुऽहवानि। संतु। शं। नः। अग्निः। ज्योतिःऽअनीकः। अस्तु। शं। नः। मि
३ त्रावरुणा। अश्विना। शं। शं। नः। सुऽकृतां। सुऽकृतानि। संतु। शं। नः। इषिरः। अभि। वातु। वातः। शं। नः। द्यावापृथिवीइति। पूर्वऽहूतौ। शं। अंतरिक्षं। दृशये। नः। अस्तु। शं। नः। ओषधीः। २ अग्निः।
वनिनः। भवंतु। शं। नः। रजसः। पतिः। अस्तु। जिष्णुः॥ २॥ ॥शं। नः। इंद्रः। वसुऽभिः। देवः। अस्तु। शं। आदित्येभिः। वरुणः। सुऽशंसः। शं। नः। रुद्रः। रुद्रेभिः। जलाषः। शं। नः। त्व
ष्टा। ग्नाभिः। इह। शृणोतु। शं। नः। सोमः। भवतु। ब्रह्म। शं। नः। शं। नः। ग्रावाणः। शं। ऊंइति। संतु। यज्ञाः। शं। नः। स्वरूणां। मितयः। भवंतु। शं। नः। प्रऽस्वः। शं। अस्तु। वेदिः। शं। नः।
सूर्यः। उरुऽचक्षाः। उत्। एतु। शं। नः। चतस्रः। प्रऽदिशः। भवंतु। शं। नः। पर्वताः। ध्रुवयः। भवंतु। शं। नः। सिंधवः। शं। ऊंइति। संतु। आपः। शं। नः। अदितिः। ऊंइति। भवतु।
व्रतेभिः। शं। नः। भवंतु। मरुतः। सुऽअर्काः। शं। नः। विष्णुः। शं। ऊंइति। पूषा। नः। अस्तु। शं। नः। भवित्रं। शं। ऊंइति। अस्तु। वायुः। शं। नः। देवः। सविता। त्रायमाणः। शं। नः। भवंतु।
उषसः। विऽभातीः। शं। नः। पर्जन्यः। भवतु। प्रऽजाभ्यः। शं। नः। क्षेत्रस्य। पतिः। अस्तु। शंऽभुः॥ ३॥ ॥शं। नः। देवाः। विश्वऽदेवाः। भवंतु। शं। सरस्वती। सह। धीभिः। अस्तु।

प. पंचमाष्ट

२३ शं । अग्निःऽसमिद्धः । शं । ऊं इति । रातिऽसाचः । शं । नः । दिव्याः । पार्थिवाः । शं । नः । अप्याः ॥ ० ॥ पतयः । भवंतु । शं । नः । अर्वंतः । शं । ऊं इति । संतु । गावः । शं । नः । ऋभवः । सुऽकृतः । सुऽह

स्ताः । शं । नः । भवंतु । पितरः । हवेषु । शं । नः । अजः । एकऽपात् । देवः । अस्तु । शं । नः । अहिः । बुध्न्यः । शं । समुद्रः । शं । नः । अपां । नपात् । पेरुः । अस्तु । शं । नः । पृश्निः । भवतु । देवऽगोपा ॥ ० ॥

जुषंत । इदं । ब्रह्म । क्रियमाणं । नवीयः । शृण्वंतु । नः । दिव्याः । पार्थिवासः । गोऽजाताः । उत । ये । यज्ञियासः ॥ ये । देवानां । यज्ञियाः । यज्ञियानां । मनोः । यजत्राः । अमृताः । ऋतऽज्ञाः ।

ते । नः । रासंतां । उरुऽगायं । अद्य ॥ ० ॥ ९ ॥ ॥ इति पंचमाष्टके तृतीयोऽध्यायः ॥ ॥ प्र । ब्रह्म । एतु । सदनात् । ऋतस्य । वि । रश्मिऽभिः । ससृजे । सूर्यः । गाः । वि । सानुना ।

पृथिवी । सस्रे । उर्वी । पृथु । प्रतीकं । अधि । आ । ईधे । अग्निः ॥ इमां । वां । मित्रावरुणा । सुऽवृक्तिं । इषं । न । कृण्वे । असुरा । नवीयः ॥ इनः । वां । अन्यः । पदऽवीः । अदब्धः । जनं । च । मि

त्रः । यतति । ब्रुवाणः ॥ आ । वातस्य । ध्रजतः । रंते । इत्याः । अपीपयंत । धेनवः । न । सूदाः ॥ महः । दिवः । सदने । जायमानः । अचिक्रदत् । वृषभः । सस्मिन् । ऊधन् ॥ गिरा । यः । एता । यु

नजत् । हरी इति । ते । इंद्र । प्रिया । सुऽरथा । शूर । धायू इति ॥ प्र । यः । मन्युं । रिरिक्षतः । मिनाति । आ । सुऽक्रतुं । अर्यमणं । ववृत्यां ॥ यजंते । अस्य । सख्यं । वयः । च । नमस्विनः । स्वे । ऋतस्य ।

धामन् ॥ वि । पृक्षः । बाबधे । नृऽभिः । स्तवानः ॥ इदं । नमः । रुद्राय । प्रेष्ठं ॥ ३ ॥ ॥ आ । यत् । साकं । यशसः । वावशानाः । सरस्वती । सप्तथी । सिंधुऽमाता ॥ याः । सुस्वयंत । सुऽ

दुघाः । सुऽधाराः । अभि । स्वेन । पयसा । पीप्यानाः ॥ उत । त्ये । नः । मरुतः । मंदसानाः । धियं । तोकं । च । वाजिनः । अवंतु ॥ मा । नः । परि । ख्यत् । अक्षरा । चरंती । अवीवृधन् । युजं । ते । र शिव २३

२थु

यिं । नः ॥ प्र । वः । महीं । अरमतिं । कृणुध्वं । प्र । पूषणं । विदथ्यं । न । वीरं । भगं । धियः । अवितारं । नः । अस्याः । सातौ । वाजं । रातिऽसाचं । पुरंऽधिं ॥ अच्छ । अयं । वः । मरुतः । श्लोकः । ए

तु । अच्छ । विष्णुं । निषिक्तऽपां । अवःऽभिः ॥ उत । प्रऽजायै । गृणते । वयः । धुः ॥ ० ॥ २ ॥ ॥ आ । वः । वाहिष्ठः । वहतु । स्तवध्यै । रथः । वाजाः । ऋभुक्षणः । अमृक्तः ॥ अभि । त्रिऽपृष्ठैः ।

सवनेषु । सोमैः । मदे । सुऽशिप्राः । महऽभिः । पृणध्वं ॥ यूयं । ह । रत्नं । मघवत्ऽसु । धत्थ [redacted] । स्वःऽदृशः । ऋभुक्षणः । अमृक्तं ॥ सं । यज्ञेषु । स्वधाऽवंतः । पिबध्वं । वि । नः । राधांसि । मतिऽ

भिः । दयध्वं ॥ उवोचिथ । हि । मघऽवन् । देष्णं । महः । अर्भस्य । वसुनः । विऽभागे ॥ उभा । ते । पूर्णा । वसुना । गभस्ती इति । न । सूनृता । नि । यमते । वसव्या ॥ त्वं । इंद्र । स्वऽयशाः । ऋभुक्षाः ।

वाजः । न । साधुः । अस्तं । एषि । ऋक्वा ॥ वयं । नु । ते । दाश्वांसः । स्याम । ब्रह्म । कृण्वंतः । हरिऽवः । वसिष्ठाः ॥ सनिता । असि । प्रऽवतः । दाशुषे । चित् । याभिः । विवेष । हरिऽअश्व । धीभिः । ववन्

म । [redacted] । नु । ते । युज्याभिः । ऊती । कदा । नः । इंद्र । रायः । आ । दशस्येः ॥ ३ ॥ ॥ वासयसिऽइव । वेधसः । त्वं । नः । कदा । नः । इंद्र । वचसः । बुबोधः ॥ अस्तं । तात्या । धिया । रयिं । सुऽ

वीरं । पृक्षः । नः । अर्वा । नि । उहीत । वाजी ॥ अभि । यं । देवी । निःऽऋतिः । चित् । ईशे । नक्षंते । इंद्रं । शरदः । सुऽपृक्षः ॥ उप । त्रिऽबंधुः । जरत्ऽअष्टिं । एति । अस्वऽवेशं । यं । कृणवंत । म पं ३

र्ताः ॥ आ । नः । राधांसि । सवितरिति । स्तवध्यै । आ । रायः । यंतु । पर्वतस्य । रातौ ॥ सदा । नः । दिव्यः । पायुः । सिसक्तु ॥ ० ॥ ४ ॥ ययाम । ० । नूनं । भगः । हव्यः । मानुषेभिः । वि । यः ।

रत्ना । पुरुऽवसुः । दधाति ॥ उत् । ऊं इति । तिष्ठ । सवितरिति । श्रुधि । अस्य । हिरण्यऽपाणे । प्रऽभृतौ । ऋतस्य ॥ वि । उर्वीं । पृथ्वीं । अमतिं । सृजानः । आ । नृऽभ्यः । मर्तऽभोजनं । सुवा

२सु

२८ नः । अपि । स्तुतः । सविता । देवः । अस्तु । यं । आ । चित् । विश्वे । वसवः । गृणंति । सः । नः । स्तोमान् । नमस्यः । चनः । धात् । विश्वेभिः । पातु । पायुऽभिः । नि । सूरीन् । ॥ अदितिः । गृणा
ति । सवं । देवस्य । सवितुः । जुषाणा । अभि । सम्ऽराजः । वरुणः । गृणंति । अभि । मित्रासः । अर्यमा । सऽजोषाः । अभि । ये । मिथः । वनुषः । सपंते । रातिं । दिवः । रातिऽसाचः । पृथिव्याः ।
अहिः । बुध्न्यः । उत । नः । शृणोतु । वरूत्री । एकधेनुऽभिः । नि । पातु । अनु । तत् । नः । जाः । पतिः । मंसीष्ट । रत्नं । देवस्य । सवितुः । इयानः । भगं । उग्रः । अवसे । जोहवीति ।
भगं । अनुग्रः । अध । याति । रत्नं । शं । नः । भवंतु । वाजिनः । हवेषु । देवऽताता । मितऽद्रवः । सुऽअर्काः । जंभयंतः । अहिं । वृकं । रक्षांसि । सनेमि । अस्मत् । युयवन् । अमीवाः । वाजेऽवाजे ।
अवत । वाजिनः । नः । धनेषु । विप्राः । अमृताः । ऋतऽज्ञाः । अस्य । मध्वः । पिबत । मादयध्वं । तृप्ताः । यात । पथिऽभिः । देवऽयानैः ॥ ८ ॥ ऊर्ध्वः । अग्निः । सुऽमतिं । वस्वः । अश्रेत् ।
प्रतीची । जूर्णिः । देवऽतातिं । एति । भेजाते इति । अद्री इति । रथ्याऽइव । पंथां । ऋतं । होता । नः । इषितः । यजाति । प्र । ववृज्रे । सुऽप्रयाः । बर्हिः । एषां । आ ।
विश्पतीइवेति विश्पतीऽइव । बीरिटे । इयाते इति । विशां । अक्तोः । उषसः । पूर्वऽहूतौ । वायुः । पूषा । स्वस्तये । नियुत्वान् । ज्मयाः । अत्र । वसवः । रंत । देवाः ।
उरौ । अंतरिक्षे । मर्जयंत । शुभ्राः । अर्वाक् । पथः । उरुऽज्रयः । कृणुध्वं । श्रोत । दूतस्य । जग्मुषः । नः । अस्य । ते । हि । यज्ञेषु । यज्ञियासः । ऊमाः । सधऽस्थं । विश्वे ।
अभि । संति । देवाः । तान् । अध्वरे । उशतः । यक्षि । अग्ने । श्रुष्टी । भगं । नासत्या । पुरंऽधिं । आ । अग्ने । गिरः । दिवः । आ । पृथिव्याः । मित्रं । वह । वरुणं । इंद्रं । अग्निं । २८

आ । अर्यमणं । अदितिं । विष्णुं । एषां । सरस्वती । मरुतः । मादयंतां । ररे । हव्यं । मतिऽभिः । यज्ञियानां । नक्षत् । कामं । मर्त्यानां । असिन्वन् । धात । रयिं । अवि
दस्यं । सदाऽसां । सक्षीमहि । युज्येभिः । नु । देवैः । नु । रोदसी इति । अभिस्तुते इत्यभिऽस्तुते । वसिष्ठैः । ऋतऽवानः । वरुणः । मित्रः । अग्निः । यच्छंतु । चंद्राः । उपऽमं । नः । अ
र्कं ॥ ७ ॥ ॥ ओ इति । श्रुष्टिः । विदथ्या । सं । एतु । प्रति । स्तोमं । दधीमहि । तुराणां । यत् । अद्य । देवः । सविता । सुवाति । स्याम । अस्य । रत्निनः । विऽभागे । मित्रः । तत् ।
नः । वरुणः । रोदसी इति । द्युऽभक्तं । इंद्रः । अर्यमा । ददातु । दिदेष्टु । देवी । अदितिः । रेक्णः । वायुः । च । यत् । नियुवैते इति निऽयुवैते । भगः । च । सः । इत् । उग्रः ।
अस्तु । मरुतः । सः । शुष्मी । यं । मर्त्यं । पृषत्ऽअश्वाः । अवाथ । उत । ईं । अग्निः । सरस्वती । जुनंति । न । तस्य । रायः । परिऽएता । अस्ति । अयं । हि । नेता । वरुणः । ऋत
स्य । मित्रः । राजानः । अर्यमा । अपः । धुरिति धुः । सुऽहवा । देवी । अदितिः । अनर्वा । ते । नः । अंहः । अति । पर्षन् । अरिष्टान् । अस्य । देवस्य । मीळ्हुषः । वयाः । विष्णोः ।
एषस्य । प्रऽभृथे । हविःऽभिः । विदे । हि । रुद्रः । रुद्रियं । महिऽत्वं । यासिष्टं । वर्तिः । अश्विनौ । इराऽवत् । मा । अत्र । पूषन् । आघृणे । इरस्यः । वरूत्री । यत् । रातिऽ
साचः । च । रासन् । मयःऽभुवः । नः । अर्वंतः । नि । पांतु । वृष्टिं । परिऽज्मा । वातः । ददातु ॥ ६ ॥ ॥ प्रातः । अग्निं । प्रातः । इंद्रं । हवामहे । प्रातः । मित्रावरुणा । प्रातः ।
अश्विना । प्रातः । भगं । पूषणं । ब्रह्मणः । पतिं । प्रातरिति । सोमं । उत । रुद्रं । हुवेम । प्रातःऽजितं । भगं । उग्रं । हुवेम । वयं । पुत्रं । अदितेः । यः । विऽधर्ता । आध्रः । चित् ।

२ भगः । एव । भगवान् । अस्तु । देवाः । तेन । वयं । भगऽवंतः । स्याम । ×

पंचमाष्ट०

उ॰

२५ राजा । चित् । यं । भगं । भक्षि । इति । आह ॥ भग । प्रनेतरितिप्रऽनेतः । भग । सत्यऽराधः । भग । इमां । धियं । उत् । अव । ददत् । नः । भग । प्र । नः । जनय । गोभिः । अश्वैः । भग ।
प्र । नृऽभिः । नृऽवंतः । स्याम ॥ उत । इदानीं । भगऽवंतः । स्याम । उत । प्रऽपित्वे । उत । मध्ये । अह्नां । उत । उत्ऽइता । मघऽवन् । सूर्यस्य । वयं । देवानां । सुऽमतौ । स्याम ॥ भ
ग । सर्वः । इत् । जोहवीति । सः । नः । भग । पुरःऽएता । भव । इह ॥ सं । अध्वराय । उषसः । नमंत । दधिक्रावाऽइव । शुचये । पदाय । अर्वाचीनं । वसुऽविदं । भगं । नः । रथंऽइव । अश्वाः ।
वाजिनः । आ । वहंतु ॥ अश्वऽवतीः । गोऽमतीः । नः । उषसः । वीरऽवतीः । सदं । उच्छंतु । भद्राः । घृतं । दुहानाः । विश्वतः । प्रऽपीताः ॥ ८ ॥ ॥ प्र । ब्रह्माणः । अंगिरसः । नक्षंत । प्र ।
क्रंदनुः । नभन्यस्य । वेतु । प्र । धेनवः । उदऽप्रुतः । नवंत । युज्यातां । अद्री इति । अध्वरस्य । पेशः ॥ सुऽगः । ते । अग्ने । सनऽवित्तः । अध्वा । युक्ष्व । सुते । हरितः । रोहितः । [illegible]
[illegible] च । ये । वा । सद्मन् । अरुषाः । वीरऽवाहः । हुवे । देवानां । जनिमानि । सत्तः ॥ सं । ऊं इति । वः । यज्ञं । महयन् । नमःऽभिः । प्र । होता । मंद्रः । रिरिचे । उपाके । यजस्व । सु । पुरुऽअनीक । देवान् ।
आ । यज्ञियान् । अरमतिं । ववृत्याः ॥ यदा । वीरस्य । रेवतः । दुरोणे । स्योनऽशीः । अतिथिः । आऽचिकेतत् । सुऽप्रीतः । अग्निः । सुऽधितः । दमे । आ । सः । विशे । दाति । वार्यं । इयत्यै ।
इमं । नः । अग्ने । अध्वरं । जुषस्व । मरुत्ऽसु । इंद्रे । यशसं । कृधि । नः । आ । नक्ता । बर्हिः । सदतां । उषसा । उशंता । मित्रावरुणा । यज । इह । देव । अग्निं । सहस्यं । वसिष्ठः । रायःऽ
कामः । विश्वऽप्स्न्यस्य । स्तौत् । इषं । रयिं । पप्रथत् । वाजं । अस्मे इति ॥ ९ ॥ ॥ प्र । वः । यज्ञेषु । देवऽयंतः । अर्चन् । द्यावा । नमःऽभिः । पृथिवी इति । इषध्यै । येषां । ब्रह्म शिव २५

णि । असमानि । विप्राः । विष्वक् । वि । यंति । वनिनः । न । शाखाः ॥ प्र । यज्ञः । एतु । हेत्वः । न । सप्तिः । उत् । यच्छध्वं । सऽमनसः । घृताचीः । स्तृणीत । बर्हिः । अध्वराय । सा
धु । ऊर्ध्वाः । शोचींषि । देवऽयूनि । अस्थुः ॥ आ । पुत्रासः । न । मातरं । विऽभृत्राः । सानौ । देवासः । बर्हिषः । सदंतु । आ । विश्वाची । विदथ्यां । अनक्तु । अग्ने । मा । नः । देवऽता
ता । मृधः । करिति कः ॥ ते । सीषपंत । जोषं । आ । यजत्राः । ऋतस्य । धाराः । सुऽदुघाः । दुहानाः । ज्येष्ठं । वः । अद्य । महः । आ । वसूनां । आ । गंतन । सऽमनसः ।
यति । स्थ ॥ एव । नः । अग्ने । विक्षु । आ । दशस्य । त्वया । वयं । सहसाऽवन् । आस्क्राः । राया । युजा । सधऽमादः । अरिष्टाः ॥ ० ॥ १० ॥ ॥ दधिऽक्रां । वः । प्रथमं । अ
श्विना । उषसं । अग्निं । संऽइद्धं । भगं । ऊतये । हुवे ॥ इंद्रं । विष्णुं । पूषणं । ब्रह्मणः । पतिं । आदित्यान् । द्यावापृथिवी इति । अपः । स्वरिति स्वः ॥ दधिऽक्रां । ऊं इति । नमसा ।
बोधयंतः । उत्ऽईरयाणाः । यज्ञं । उपऽप्रयंतः । इळां । देवीं । बर्हिषि । सादयंतः । अश्विना । विप्रा । सुऽहवा । हुवेम ॥ दधिऽक्रावाणं । बुबुधानः । अग्निं । उप । ब्रुवे । उषसं ।
सूर्यं । गां । ब्रध्नं । मंश्चतोः । वरुणस्य । बभ्रुं । ते । विश्वा । अस्मत् । दुःऽइता । यवयंतु ॥ दधिऽक्रावा । प्रथमः । वाजी । अर्वा । अग्रे । रथानां । भवति । प्रऽजानन् । संऽविदा
नः । उषसा । सूर्येण । आदित्येभिः । वसुऽभिः । अंगिरःऽभिः ॥ आ । नः । दधिऽक्राः । पथ्यां । अनक्तु । ऋतस्य । पंथां । अनुऽएतवै । ऊं इति । शृणोतु । नः । दैव्यं । शर्धः । अग्निः ।
शृण्वंतु । विश्वे । महिषाः । अमूराः ॥ ११ ॥ ॥ आ । देवः । यातु । सविता । सुऽरत्नः । अंतरिक्षऽप्राः । वहमानः । अश्वैः । हस्ते । दधानः । नर्या । पुरूणि । निऽवेशयन् । च ।

२८ प्रऽसुवन्। च। क्षमेतऽउत। अस्य। बाहू इति। शिथिरा। बृहंतां। हिरण्ययां। दिवः। अंतान्। अनष्टां। नूनं। सः। अस्य। महिमा। पनिष्ट। सूरः। चित्। अस्मै। अनु। दात्। अप
पस्यां। सः। घ। नः। देवः। सविता। सहऽवा। आ। साविषत्। वसुऽपतिः। वसूनि। विऽश्रयमाणः। अमतिं। उरूचीं। मर्तऽभोजनं। अध। रासते। नः। इमाः। गिरः। सवितारं।।
सुऽजिह्वं। पूर्णऽगभस्तिं। ईळते। सुऽपाणिं। चित्रं। वयः। बृहत्। अस्मेइति। दधातु। ०।।२२।। ।।इमाः। रुद्राय। स्थिरऽधन्वने। गिरः। क्षिप्रऽइषवे। देवाय। स्वधाऽ
व्ने। अषाळ्हाय। सहमानाय। वेधसे। तिग्मऽआयुधाय। भरत। शृणोतु। नः। सः। हि। क्षयेण। क्षम्यस्य। जन्मनः। सांऽराज्येन। दिव्यस्य। चेतति। अवन्। अवतीः। उ
प। नः। दुरः। चर। अनमीवः। रुद्र। जासु। नः। भव। या। ते। दिद्युत्। अवऽसृष्टा। दिवः। परि। क्ष्मया। चरति। परि। सा। वृणक्तु। नः। सहस्रं। ते। सुऽअपिवात। भेष
जा। मा। नः। तोकेषु। तनयेषु। रिरिषः। मा। नः। वधीः। रुद्र। मा। परा। दाः। मा। ते। भूम। प्रऽसितौ। हीळितस्य। आ। नः। भज। बर्हिषि। जीवऽशंसे। ०।।२३।। ।।
आपः। यं। वः। प्रथमं। देवऽयंतः। इंद्रऽपानं। ऊर्मिं। अकृण्वत। इळः। तं। वः। वयं। शुचिं। अरिप्रं। अद्य। घृतऽप्रुषं। मधुऽमंतं। वनेम। तं। ऊर्मिं। आपः। मधुमत्ऽतमं।
वः। अपां। नपात्। अवतु। आशुऽहेमा। यस्मिन्। इंद्रः। वसुऽभिः। मादयाते। तं। अश्याम। देवऽयंतः। वः। अद्य। शतऽपवित्राः। स्वधया। मदंतीः। देवीः। देवानां। अपि। शत
यंति। पाथः। ताः। इंद्रस्य। न। मिनंति। व्रतानि। सिंधुऽभ्यः। हव्यं। घृतऽवत्। जुहोत। याः। सूर्यः। रश्मिऽभिः। आऽततान। याभ्यः। इंद्रः। अरदत्। गातुं। ऊर्मिं। ते। सिंध २८

ऊर्मिं १

वः। वरिवः। धातन। नः। ०।।२४।। ।।ऋभुक्षणः। वाजाः। मादयध्वं। अस्मेइति। नरः। मघऽवानः। सुतस्य। आ। वः। अर्वाचः। क्रतवः। न। यातां। विऽभ्वः। रथं। नर्यं। वर्तयंतु। स
ऋभुः। ऋभुऽभिः। अभि। वः। स्याम। विऽभ्वः। विभुऽभिः। शवसा। शवांसि। वाजः। अस्मान्। अवतु। वाजऽसातौ। इंद्रेण। युजा। तरुषेम। वृत्रं। ते। चित्। हि। नु। वरिः। अभि। संति
शासा। विश्वान्। अर्यः। उपऽताति। वन्वन्। इंद्रः। विऽभ्वा। ऋभुक्षाः। वाजः। अर्यः। शत्रोः। मिथुत्या। कृणवन्। वि। नृम्णं। नु। देवासः। वरिवः। कर्तन। नः। भूत। नः। वि
श्वे। अवसे। सऽजोषाः। सं। अस्मेइति। इषं। वसवः। ददीरन्। ०।।२५।। ।।समुद्रऽज्येष्ठाः। सलिलस्य। मध्यात्। पुनानाः। यंति। अनिऽविशमानाः। इंद्रः। याः। वज्री। वृष
भः। रराद। ताः। आपः। देवीः। इह। मां। अवंतु। याः। आपः। दिव्याः। उत। वा। स्रवंति। खनित्रिमाः। उत। वा। याः। स्वयंऽजाः। समुद्रऽअर्थाः। याः। शुचयः। पावकाः। ०। यासां।
राजा। वरुणः। याति। मध्ये। सत्यानृतेइति। अवऽपश्यन्। जनानां। मधुऽश्चुतः। शुचयः। याः। पावकाः। ०। यासु। राजा। वरुणः। यासु। सोमः। विश्वे। देवाः। यासु। ऊर्जं। म
दंति। वैश्वानरः। यासु। अग्निः। प्रऽविष्टः। ०।।२६।। ।।आ। मां। मित्रावरुणा। इह। रक्षतं। कुलायऽयत्। विश्वऽयत्। मा। नः। आ। गन्। अजकावं। दुःऽदृशीकं। तिरः।
दधे। मा। मां। पद्येन। रपसा। विदत्। त्सरुः। यत्। विऽजामन्। परुषि। वंदनं। भुवत्। अष्ठीवंतौ। परि। कुल्फौ। च। देहत्। अग्निः। तत्। शोचन्। अप। बाधतां। इतः। ०। यत्।
८४८ शल्मलौ। भवति। यत्। नदीषु। यत्। ओषधीभ्यः। परि। जायते। विषं। विश्वे। देवाः। निः। इतः। तत्। सुवंतु। ०। याः। प्रऽवतः। निऽवतः। उत्ऽवतः। उदन्वतीः। अनुदकाः।

पंचमा- यी। याः। नाः। अस्मभ्यं। पयसा। पिन्वमानाः। शिवाः। देवीः। अशिपदाः। भवंतु। सर्वाः। नद्यः। अशिमिदाः। भवंतु। ४ ॥ ६ ॥ आदित्यानां। अवसा। नूतनेन। सक्षीमहि। श-
२० र्मणा। शंऽतमेन। अनागाःऽत्वे। अदितिऽत्वे। तुरासः। इमं। यज्ञं। दधतु। श्रोषमाणाः। आदित्यासः। अदितिः। मादयंतां। मित्रः। अर्यमा। वरुणः। रजिष्ठाः। अस्माकं। संतु। भु-
वनस्य। गोपाः। पिबंतु। सोमं। अवसे। नः। अद्य। आदित्याः। विश्वे। मरुतः। च। विश्वे। देवाः। च। विश्वे। ऋभवः। च। विश्वे। इंद्रः। अग्निः। अश्विना। तुस्तुवानाः। ३ ॥ ॥
आदित्यासः। अदितयः। स्याम। पूः। देवऽत्रा। वसवः। मर्त्यऽत्रा। सनेम। मित्रावरुणा। सनंतः। भवेम। द्यावापृथिवी इति। भवंतः। ॥ मित्रः। तत्। नः। वरुणः। ममहंत। शर्म। तोकाय। तनयाय। गोपाः। मा।
वः। भुजेम। अन्यऽजातं। एनः। मा। तत्। कर्म। वसवः। यत्। चयध्वे। तुरण्यवः। अंगिरसः। नक्षंत। रत्नं। देवस्य। सवितुः। इयानाः। पिता। च। तत्। नः। महान्। यजत्रः। वि-
श्वे। देवाः। सऽमनसः। जुषंत। ॥ ॥ ॥ नमःऽभिः। सऽबाधः। ईळे। बृहती इति। यजत्रे इति। ते इति। चित्। हि। पूर्वे। कवयः। गृणंतः। पुरः। मही इति। दधिरे। देवपुत्रे इति देवऽपु-
त्रे। प्र। पूर्वजे इति पूर्वऽजे। पितरा। नव्यसीभिः। गीःऽभिः। कृणुध्वं। सदने इति। ऋतस्य। आ। नः। द्यावापृथिवी इति। दैव्येन। जनेन। यातं। महि। वां। वरूथं। उतो इति। हि। वां। र-
त्नऽधेयानि। संति। पुरूणि। द्यावापृथिवी इति। सुऽदासे। अस्मे इति। धत्तं। यत्। असत्। अस्कृधोयु। ॥ २० ॥ वास्तोः। पते। प्रति। जानीहि। अस्मान्। सुऽआवेशः। नः। शिव
अनमीवः। भव। नः। यत्। त्वा। ईमहे। प्रति। तत्। नः। जुषस्व। शं। नः। भव। द्विऽपदे। चतुःऽपदे। वास्तोः। पते। प्रऽतरणः। नः। एधि। गयऽस्फानः। गोभिः। अश्वेभिः। इंदो इति। अ- २७

(इ॥ ॥)

जरासः। ते। सख्ये। स्याम। पिताऽइव। पुत्रान्। प्रति। नः। जुषस्व। वास्तोः। पते। शग्मया। संऽसदा। ते। सक्षीमहि। रण्वया। गातुऽमत्या। पाहि। क्षेमे। उत। योगे। वरं। नः। ॥ २१ ॥ ॥ अमीव-
ऽहा। वास्तोः। पते। विश्वा। रूपाणि। आऽविशन्। सखा। सुऽशेवः। एधि। नः। यत्। अर्जुन। सारमेय। दतः। पिशंग। यच्छसे। विऽइव। भ्राजंते। ऋष्टयः। उप। स्रक्वेषु। बप्सतः। नि। सु। स्वप। स्ते-
नं। राय। सारमेय। तस्करं। वा। पुनःऽसर। स्तोतॄन्। इंद्रस्य। रायसि। किं। अस्मान्। दुच्छुनाऽयसे। [illegible] ॥ त्वं। सूकरस्य। दर्दृहि। तव। दर्दर्तु। सूकरः। ॥ सस्तु। माता। सस्तु। पिता। सस्तु।
श्वा। सस्तु। विश्पतिः। ससंतु। सर्वे। ज्ञातयः। सस्तु। अयं। अभितः। जनः। यः। आस्ते। यः। च। चरति। यः। च। पश्यति। नः। जनः। तेषां। सं। हन्मः। अक्षाणि। यथा। इदं। हर्म्यं। त-
था। सहस्रऽशृंगः। वृषभः। यः। समुद्रात्। उत्ऽआचरत्। तेन। सहस्येन। वयं। नि। जनान्। स्वापयामसि। प्रोष्ठेऽशयाः। वह्येऽशयाः। नारीः। याः। तल्पऽशीवरीः। स्त्रियः। याः। पुण्यऽ-
गंधाः। ताः। सर्वाः। स्वापयामसि। ॥ २२ ॥ ॥ के। ईं। विऽअक्ताः। नरः। सऽनीळाः। रुद्रस्य। मर्याः। अध। सुऽअश्वाः। नकिः। हि। एषां। जनूंषि। वेद। ते। अंग। विद्रे। मिथः। जनित्रं। अ-
भि। स्वपूःऽभिः। मिथः। वपंत। वातऽस्वनसः। श्येनाः। अस्पृध्रन्। एतानि। धीरः। निण्या। चिकेत। पृश्निः। यत्। ऊधः। मही। जभार। सा। विट्। सुऽवीरा। मरुत्ऽभिः। अस्तु। सनात्।
सहंती। पुष्यंती। नृम्णं। यामं। येष्ठाः। शुभा। शोभिष्ठाः। श्रिया। संऽमिश्लाः। ओजःऽभिः। उग्राः। उग्रं। वः। ओजः। स्थिरा। शवांसि। अध। मरुत्ऽभिः। गणः। तुविष्मान्। शुभ्रः। वः। शु-
ष्मः। क्रुध्मी। मनांसि। धुनिः। मुनिःऽइव। शर्धस्य। धृष्णोः। सनेमि। अस्मत्। युयोत। दिद्युं। मा। वः। दुःऽमतिः। इह। प्रणक्। नः। प्रिया। वः। नाम। हुवे। तुराणां। आ। यत्। तृपत्। मरुतः। वा-

ऋ॰ पदे॰ ४

वृसानाः ॥ [illegible] ॥ ॥ सुऽआयुधासः । इष्मिणः । सुऽनिष्काः । उत । स्वयं । तन्वः । शुंभमानाः । शुची । वः । हव्या । मरुतः । शुचीनां । शुचिं । हिनोमि । अध्वरं । शुचिऽभ्यः । ऋतेन । सत्यं ।
सत्यऽसापः । आयन् । शुचिऽजन्मानः । शुचयः । पावकाः ॥ अंसेषु । आ । मरुतः । खादयः । वः । वक्षःऽसु । रुक्माः । उपऽशिश्रियाणाः । वि । विऽद्युतः । न । वृष्टिऽभिः । रुचानाः । अनु । स्वधां ।
आयुधैः । यच्छमानाः ॥ प्र । बुध्न्या । वः । ईरते । महांसि । प्र । नामानि । प्रऽयज्यवः । तिरध्वं । सहस्रियं । दम्यं । भागं । एतं । गृहऽमेधीयं । मरुतः । जुषध्वं ॥ यदि । स्तुतस्य । मरुतः । अधिऽ
इथ । इत्था । विप्रस्य । वाजिनः । हवीमन् । मक्षु । रायः । सुऽवीर्यस्य । दात । नु । चित् । यं । अन्यः । आऽदभत् । अराव्णा ॥ [illegible] ॥ ॥ अत्यासः । न । ये । मरुतः । सुऽअंचः । यक्षऽदृशः ।
न । शुभयंत । मर्याः । ते । हर्म्येऽस्थाः । शिशवः । न । शुभ्राः । वत्सासः । न । प्रऽक्रीळिनः । पयःऽधाः ॥ दशस्यंतः । नः । मरुतः । मृळंतु । वरिवस्यंतः । रोदसी इति । सुमेके इति सुऽमे
के । आरे । गोऽहा । नृऽहा । वधः । वः । अस्तु । सुम्नेभिः । अस्मे इति । वसवः । नमध्वं ॥ आ । वः । होता । जोहवीति । सत्तः । सत्राचीं । रातिं । मरुतः । गृणानः । यः । ईवतः । वृषणः । अस्ति ।
गोपाः । सः । अद्वयावी । हवते । वः । उक्थैः ॥ इमे । तुरं । मरुतः । रमयंति । इमे । सहः । सहसः । आ । नमंति । इमे । शंसं । वनुष्यतः । नि । पांति । गुरु । द्वेषः । अररुषे । दधंति ॥ इमे । रध्रं । चि
त् । मरुतः । जुनंति । भृमिं । चित् । यथा । वसवः । जुषंत । अप । बाधध्वं । वृषणः । तमांसि । धत्त । विश्वं । तनयं । तोकं । अस्मे इति ॥ [illegible] ॥ ॥ मा । वः । दात्रात् । मरुतः । निः । अ
राम । मा । पश्चात् । दघ्म । रथ्यः । आ । नः । स्पार्हे । भजतन । वसव्ये । यत् । ईं । सुऽजातं । वृषणः । वः । अस्ति ॥ सं । यत् । हनंत । मन्युऽभिः । जनासः । शूराः । यह्वीषु । ओषधीषु । विक्षु । अध ।

\ विऽभागे ॥

स्म । नः । मरुतः । रुद्रियासः । त्रातारः । भूत । पृतनासु । अर्यः ॥ भूरि । चक्र । मरुतः । पित्र्याणि । उक्थानि । या । वः । शस्यंते । पुरा । चित् । मरुत्ऽभिः । उग्रः । पृतनासु । साळ्हा । मरुत्ऽभिः ।
इत् । सनिता । वाजं । अर्वा ॥ अस्मे इति । वीरः । मरुतः । शुष्मी । अस्तु । जनानां । यः । असुरः । विऽधर्ता । अपः । येन । सुऽक्षितये । तरेम । अध । स्वं । ओकः । अभि । वः । स्याम ॥ [illegible] ॥ मध्वः ।
वः । नाम । मारुतं । यजत्राः । प्र । यज्ञेषु । शवसा । मदंति । ये । रेजयंति । रोदसी इति । चित् । उर्वी इति । पिन्वंति । उत्सं । यत् । अयासुः । उग्राः ॥ निऽचेतारः । हि । मरुतः । गृणंतं । प्रऽनेतारः ।
यजमानस्य । मन्म । अस्माकं । अद्य । विदथेषु । बर्हिः । आ । वीतये । सदत । पिप्रियाणाः ॥ न । एतावत् । अन्ये । मरुतः । यथा । इमे । भ्राजंते । रुक्मैः । आयुधैः । तनूभिः । आ । रोदसी इति । वि
श्वऽपिशः । पिशानाः । समानं । अंजि । अंजते । शुभे । कं ॥ ऋधक् । सा । वः । मरुतः । दिद्युत् । अस्तु । यत् । वः । आगः । पुरुषता । कराम । मा । वः । तस्यां । अपि । भूम । यजत्राः । अस्मे इ
ति । वः । अस्तु । सुऽमतिः । चनिष्ठा ॥ कृते । चित् । अत्र । मरुतः । रणंत । अनवद्यासः । शुचयः । पावकाः । प्र । नः । अवत । सुमतिऽभिः । यजत्राः । प्र । वाजेभिः । तिरत । पुष्यसे । नः ॥
उत । स्तुतासः । मरुतः । व्यंतु । विश्वेभिः । नामऽभिः । नरः । हवींषि । ददात । नः । अमृतस्य । प्रऽजायै । जिगृत । रायः । सूनृता । मघानि ॥ आ । स्तुतासः । मरुतः । विश्वे । ऊती । अच्छ ।
सूरीन् । सर्वऽताता । जिगात । ये । नः । त्मना । शतिनः । वर्धयंति ॥ [illegible] ॥ ॥ प्र । साकंऽउक्षे । अर्चत । गणाय । यः । दैव्यस्य । धाम्नः । तुविष्मान् । उत । क्षोदंति । रोदसी इति । महिऽ
त्वा । नक्षंते । नाकं । निःऽऋतेः । अवंशात् ॥ जनूः । चित् । वः । मरुतः । त्वेष्येण । भीमासः । तुविऽमन्यवः । अयासः । प्र । ये । महःऽभिः । ओजसा । उत । संति । विश्वः । वः । यामन् । भयते ।

१ मां

२९ स्वऽअश्वे । बृहत् । वयः । मघवत्ऽभ्यः । दधात । जुजोषन् । इत् । मरुतः । सुऽस्तुतिं । नः । गन्तः । न । अध्वा । वि । तिराति । जंतुं । प्र । नः । स्पार्हाभिः । ऊतिऽभिः । तिरेत । युष्माऽऊतः । मरुतः । शतस्वी ।
युष्माऽऊतः । अर्वा । सहुरिः । सहस्री । युष्माऽऊतः । संऽराट् । उत । हंति । वृत्रं । प्र । तत् । वः । अस्तु । धूतयः । देष्णं । तान् । आ । रुद्रस्य । मीळ्हुषः । विवासे । कुवित् । नंसंते । मरुतः । ४ विप्रः ४ पुनः । नः । य
त् । सस्वर्ता । जिहीळिरे । यत् । आविः । अव । तत् । एनः । ईमहे । तुराणां । आ । सा । वाचि । सुऽस्तुतिः । मघोनां । इदं । सुऽउक्तं । मरुतः । जुषंत । आरात् । चित् । द्वेषः । वृषणः । युयोत । ॥ २८ ॥
॥ यं । त्रायध्वे । इदंऽइदं । देवासः । यं । च । नयथ । तस्मै । अग्ने । वरुण । मित्र । अर्यमन् । मरुतः । शर्म । यच्छत । ईजानः । तरति । द्विषः । प्र । सः । क्षयं । तिरते । वि । महीः । इषः । यः ।
वः । वराय । दाशति । नहि । वः । चरमं । चन । वसिष्ठः । परिऽमंसते । अस्माकं । अद्य । मरुतः । सुते । सचा । विश्वे । पिबत । कामिनः । नहि । वः । ऊतिः । पृतनासु । मर्धति । यस्मै । अराध्वं । नरः ।
अभि । वः । आ । अवर्तत् । सुऽमतिः । नवीयसी । तूयं । यात । पिपीषवः । ओ इति । सु । घृष्विऽराधसः । यातन । अंधांसि । पीतये । इमा । वः । हव्या । मरुतः । ररे । हि । कं । मो इति । सु । अन्यत्र । ग
न्तन । आ । च । नः । बर्हिः । सदत । अवित । च । नः । स्पार्हाणि । दातवे । वसु । अस्रेधंतः । मरुतः । सोम्ये । मधौ । स्वाहा । इह । मादयाध्वै ॥ २९ ॥ ॥ सस्वरिति । चित् । हि ।
तन्वः । शुंभमानाः । आ । हंसासः । नीलऽपृष्ठाः । अपप्तन् । विश्वं । शर्धः । अभितः । मा । नि । सेद । नरः । न । रण्वाः । सवने । मदंतः । यः । नः । मरुतः । अभि । दुःऽहृणायुः । तिरः ।
चित्तानि । वसवः । जिघांसति । द्रुहः । पाशान् । प्रति । सः । मुचीष्ट । तपिष्ठेन । हन्मना । हंतन । तं । सांतऽपनाः । इदं । हविः । मरुतः । तत् । जुजुष्टन । युष्माक । ऊती । रिशादसः । गृहऽ शिव २९

मेधासः । आ । गत । मरुतः । मा । अप । भूतन । युष्माक । ऊती । सुऽदानवः । इहऽइह । वः । स्वऽतवसः । कवयः । सूर्यऽत्वचः । यज्ञं । मरुतः । आ । वृणे । त्र्यंबकं । यजामहे । सुगंधिं । पुष्टि
ऽवर्धनं । उर्वारुकंऽइव । बंधनात् । मृत्योः । मुक्षीय । मा । अमृतात् ॥ ३० ॥ ॥ इति पंचमाष्टके चतुर्थोध्यायः ॥ ॥ यत् । अद्य । सूर्य । ब्रवः । अनागाः । उत्ऽयन् । मित्राय । वरुणाय ।
सत्यं । वयं । देवऽत्रा । अदिते । स्याम । तव । प्रियासः । अर्यमन् । गृणंतः । एषः । स्यः । मित्रावरुणा । नृऽचक्षाः । उभे इति । उत् । एति । सूर्यः । अभि । ज्मन् । विश्वस्य । स्थातुः । जगतः । च । गो
पाः । ऋजु । मर्तेषु । वृजिना । च । पश्यन् । अयुक्त । सप्त । हरितः । सधऽस्थात् । याः । ईं । वहंति । सूर्यं । घृताचीः । धामानि । मित्रावरुणा । युवाकुः । सः । यः । यूथाऽइव । जनिमानि । चष्टे । उत् ।
वां । पृक्षासः । मधुऽमंतः । अस्थुः । आ । सूर्यः । अरुहत् । शुक्रं । अर्णः । यस्मै । आदित्याः । अध्वनः । रदंति । मित्रः । अर्यमा । वरुणः । सऽजोषाः । इमे । चेतारः । अनृतस्य । भूरेः । मित्रः ।
अर्यमा । वरुणः । हि । संति । इमे । ऋतस्य । ववृधुः । दुरोणे । शग्मासः । पुत्राः । अदितेः । अदब्धाः । इमे । मित्रः । वरुणः । दुःऽदभासः । अचेतसं । चित् । चितयंति । दक्षैः । अपि । क्रतुं ।
सुऽचेतसं । वतंतः । तिरः । चित् । अंहः । सुऽपथा । नयंति ॥ १ ॥ ॥ इमे । दिवः । अनिऽमिषा । पृथिव्याः । चिकित्वांसः । अचेतसं । नयंति । प्रऽव्राजे । चित् । नद्यः । गाधं । अस्ति । पारं । नः ।
अस्य । विऽष्पितस्य । पर्षन् । यत् । गोपावत् । अदितिः । शर्म । भद्रं । मित्रः । यच्छंति । वरुणः । सुऽदासे । तस्मिन् । आ । तोकं । तनयं । दधानाः । मा । कर्म । देवऽहेळनं । अव । वेदिं । होत्रा ३ तुरासः
भिः । यजेत । रिपः । काः । चित् । वरुणऽध्रुतः । सः । परि । द्वेषःऽभिः । अर्यमा । वृणक्तु । उरुं । सुऽदासे । वृषणौ । ऊं इति । लोकं ॥ २ ॥ संऽसीतिः । त्वेषी । एषां । अपीच्येन । सहसा । सहंते । युष्म
त् । भिया । वृषणः । रेजमानाः । दक्षस्य । चित् । महिना । मृळत । नः । यः । ब्रह्मणे । सुऽमतिं । आऽयजाते । वाजस्य । सातौ । परमस्य । रायः । सीक्षंत । मन्युं । मघऽवानः । अर्यः । उरु ।

प·पंचमाष्टक

क्षयाय। चक्रिरे। सुऽधातु। इयं। देवा। पुरःऽहितिः। युवऽभ्यां। यज्ञेषु। मित्रावरुणौ। अकारि। विश्वानि। दुःऽगा। पिपृतं। तिरः। नः। [illegible] ॥ ॥ उत्। वां। चक्षुः। वरुण। सुऽप्र
३० तीकं। देवयोः। एति। सूर्यः। ततन्वान्। अभि। यः। विश्वा। भुवनानि। चष्टे। सः। मन्युं। मर्त्येषु। आ। चिकेत। प्र। वां। सः। मित्रावरुणौ। ऋतऽवा। विप्रः। मन्मानि। दीर्घऽश्रुत्। इयर्ति। यस्य।
ब्रह्माणि। सुक्रतू इति सुऽक्रतू। अवाथः। आ। यत्। क्रत्वा। न। शरदः। पृणैथे इति। प्र। उरोः। मित्रावरुणा। पृथिव्याः। प्र। दिवः। ऋष्वात्। बृहतः। सुदानू इति सुऽदानू। स्पशः। दधा
थे इति। ओषधीषु। विक्षु। ऋधक्। यता। अनिऽमिषं। रक्षमाणा। शंसा। मित्रस्य। वरुणस्य। धाम। शुष्मः। रोदसी इति। बद्बधे। महिऽत्वा। अयन्। मासाः। अयज्वनां। अवीराः। प्र। य
ज्ञऽमन्मा। वृजनं। तिराते। अमूराः। विश्वाः। वृषणौ। इमाः। वां। न। यासु। चित्रं। ददृशे। न। यक्षं। द्रुहः। सचन्ते। अनृता। जनानां। न। वां। निण्यानि। अचिते। अभूवन्। सं। ऊं इति। वां। य
ज्ञं। महयं। नमःऽभिः। हुवे। वां। मित्रावरुणा। सऽबाधः। प्र। वां। मन्मानि। ऋचसे। नवानि। कृतानि। ब्रह्म। जुजुषन्। इमानि॥ ३॥ ॥ उत्। सूर्यः। बृहत्। अर्चींषि। अश्रेत्। पुरु। विश्वा।
जनिम। मानुषाणां। समः। दिवा। ददृशे। रोचमानः। क्रत्वा। कृतः। सुऽकृतः। कर्तृऽभिः। भूत्। सः। सूर्य। प्रति। पुरः। नः। उत्। गाः। एभिः। स्तोमेभिः। एतशेभिः। एवैः। प्र। नः। मि
त्राय। वरुणाय। वोचः। अनागसः। अर्यम्णे। अग्नये। च। वि। नः। सहस्रं। शुरुधः। रदन्तु। ऋतऽवानः। वरुणः। मित्रः। अग्निः। ० । आ। नः। कामं। पुपूरन्तु। स्तवानाः। द्यावा
भूमी इति। अदिते। त्रासीथां। नः। ये। वां। जज्ञुः। सुऽजनिमानः। ऋष्वे इति। मा। हेळे। भूम। वरुणस्य। वायोः। मा। मित्रस्य। प्रियऽतमस्य। नृणां। प्र। बाहवा। सिसृतं। जीवसे। नः।
आ। नः। गव्यूतिं। उक्षतं। घृतेन। आ। नः। जने। श्रवयतं। युवाना। श्रुतं। मे। मित्रावरुणा। हवा। इमा। नु। मित्रः। वरुणः। अर्यमा। नः। त्मने। तोकाय। वरिवः। दधन्तु। सुऽगा। नः। शिव ३०

औ २

विश्वा। सुऽपथानि। सन्तु॥ ० ॥ ६ ॥ ॥ उत्। ऊं इति। एति। सुऽभगः। विश्वऽचक्षाः। साधारणः। सूर्यः। मानुषाणां। चक्षुः। मित्रस्य। वरुणस्य। देवः। चर्मऽइव। यः। सं। अविव्यक्।
तमांसि। ० । प्रऽसविता। जनानां। महान्। केतुः। अर्णवः। सूर्यस्य। समानं। चक्रं। परिऽआविवृत्सन्। यत्। एतशः। वहति। धूःऽसु। युक्तः। विऽभ्राजमानः। उषसां। उपऽस्थात्। रेभैः।
उत्। एति। अनुऽमद्यमानः। एषः। मे। देवः। सविता। चच्छन्द। यः। समानं। न। प्रऽमिनाति। धाम। दिवः। रुक्मः। उरुऽचक्षाः। उत्। एति। दूरेऽअर्थः। तरणिः। भ्राजमानः। नूनं। जनाः।
सूर्येण। प्रऽसूताः। अयन्। अर्थानि। कृणवन्। अपांसि। यत्र। चक्रुः। अमृताः। गातुं। अस्मै। श्येनः। न। दीयन्। अनु। एति। पाथः। प्रति। वां। सूरे। उत्ऽइते। विधेम। नमःऽ
भिः। मित्रावरुणा। उत। हव्यैः॥ ० ॥ ५ ॥ ॥ दिवि। क्षयन्ता। रजसः। पृथिव्यां। प्र। वां। घृतस्य। निःऽनिजः। ददीरन्। हव्यं। नः। मित्रः। अर्यमा। सुऽजातः। राजा। सुऽक्षत्रः। वरुणः।
जुषन्त। आ। राजाना। महः। ऋतस्य। गोपा। सिंधुपती इति सिंधुऽपती। क्षत्रिया। यातं। अर्वाक्। इळां। नः। मित्रावरुणा। उत। वृष्टिं। अव। दिवः। इन्वतं। जीरदानू इति जीरऽदा
नू। ० । देवः। अर्यः। प्र। साधिष्ठेभिः। पथिऽभिः। नयन्तु। ब्रवत्। यथा। नः। आत्। अरिः। सुऽदासे। इषा। मदेम। सह। देवऽगोपाः। यः। वां। गर्तं। मनसा। तक्षत्। एतं। ऊर्ध्वां। धीतिं। कृ
णवत्। धारयत्। च। उक्षेथां। मित्रावरुणा। घृतेन। ता। राजाना। सुऽक्षितीः। तर्पयेथां। एषः। स्तोमः। वरुण। मित्र। तुभ्यं। सोमः। शुक्रः। न। वायवे। अयामि। ० ॥ ६ ॥ ॥ सुऽउक्तैः।
मित्रं। हुवे। वरुणं। पूतऽदक्षं। ययोः। असुर्यं। अक्षितं। ज्येष्ठं। विश्वस्य। यामन्। आऽचिता। जिगत्नु। ता। हि। देवानां। असुरा। तौ। अर्या। ता। नः। क्षितीः। करतं। ऊर्जयन्तीः। अश्या
म। मित्रावरुणा। वयं। वां। द्यावा। च। यत्र। पीपयन्। अहा। च। ता। भूरिऽपाशौ। अनृतस्य। सेतू इति। दुरत्येतू इति दुःऽअत्येतू। रिपवे। मर्त्याय। ऋतस्य। मित्रावरुणा। पथा।

पदैं समाप्तः कया। वः। अपः। न। नावा। दुःऽइता। तरेम। आ। नः। मित्रावरुणा। हव्यऽजुष्टिं। घृतैः। गव्यूतिं। उक्षतं। इळाभिः। प्रति। वां। अत्र। वरं। आ। जनाय। पृणीतं। उदः। दिव्यस्य। चारोः।
३३ ०॥ ७॥ प्र। मित्रयोः। वरुणयोः। स्तोमः। नः। एतु। शूष्यः। नमस्वान्। तुविऽजातयोः। या। धारयंत। देवाः। सुऽदक्षा। दक्षऽपितरा। असुर्याय। प्रऽमहसा। ता। नः। स्तिऽपा। तनूऽ
पा। वरुण। जरितॄणां। मित्र। साधयतं। धियः। यत्। अद्य। सूरे। उतऽइते। अनागाः। मित्रः। अर्यमा। सुवाति। सविता। भगः। सुऽप्रऽअवीः। अस्तु। सः। क्षयः। प्र। नु। यामन्। सुऽदान
वः। ये। नः। अंहः। अतिऽपिप्रति॥ ८॥ ॥ उत। स्वऽराजः। अदितिः। अदब्धस्य। व्रतस्य। ये। महः। राजानः। ईशते॥ ०॥ मित्रं। गृणीषे। वरुणं। अर्यमणं। रिशादसं। राया। हिरण्यऽया। मतिः।
इयं। अवृकाय। शवसे। इयं। विप्रा। मेधऽसातये। ते। स्याम। देव। वरुण। ते। मित्र। सूरिऽभिः। सह। इषं। स्वरिति स्वः। च। धीमहि। बहवः। सूरऽचक्षसः। अग्निऽजिह्वाः। ऋतऽवृ
धः। त्रीणि। ये। येमुः। विदथानि। धीतिऽभिः। विश्वानि। परिभूतिऽभिः॥ ९॥ ॥ वि। ये। दधुः। शरदं। मासं। आत्। अहः। यज्ञं। अक्तुं। च। आत्। ऋचं। अनाप्यं। वरुणः। मित्रः।
अर्यमा। क्षत्रं। राजानः। आशत। तत्। वः। अद्य। मनामहे। सुऽउक्तैः। सूरे। उतऽइते। यत्। ओहते। वरुणः। मित्रः। अर्यमा। यूयं। ऋतस्य। रथ्यः। ऋतऽवानः। ऋतऽजाताः। ऋतऽवृधः।
सुछर्दिः घोरासः। अनृतऽद्विषः। तेषां। वः। सुम्ने। सुछर्दिःऽतमे। नरः। स्याम। ये। च। सूरयः। उत्। ऊं इति। त्यत्। दर्शतं। वपुः। दिवः। एति। प्रतिऽह्वरे। यत्। ईं। आशुः। वहति। देवः। एतशः।
विश्वस्मै। चक्षसे। अरं। शीर्ष्णःऽशीर्ष्णः। जगतः। तस्थुषः। पतिं। समया। विश्वं। आ। रजः। सप्त। स्वसारः। सुविताय। सूर्यं। वहंति। हरितः। रथे॥ १०॥ ॥ तत्। चक्षुः। देवऽहितं। शु शिव
क्रं। उत्ऽचरत्। पश्येम। शरदः। शतं। जीवेम। शरदः। शतं। काव्येभिः। अदाभ्या। आ। यातं। वरुण। द्युऽमत्। मित्रः। च। सोमऽपीतये। दिवः। धामऽभिः। वरुण। मित्रः। च। आ। यातं। अ ३२

१तं द्रुहा। पिबतं। सोमं। आतुजी इत्याऽतुजी। आ। यातं। मित्रावरुणा। जुषाणौ। आऽहुतिं। नरा॥ ०॥ ११॥ प्रति। वां। रथं। नृपती इति नृऽपती। जरध्यै। हविष्मता। मनसा। यज्ञियेन। यः। वां।
दूतः। न। धिष्ण्यौ। अजीगः। अच्छ। सूनुः। न। पितरा। विवक्मि। अशोचि। अग्निः। संऽइधानः। अस्मे इति। उपो इति। अदृश्रन्। तमसः। चित्। अंताः। अचेति। केतुः। उषसः। पुरस्तात्। श्रिये।
दिवः। दुहितुः। जायमानः। अभि। वां। नूनं। अश्विना। सुऽहोता। स्तोमैः। सिसक्ति। नासत्या। विवक्वान्। पूर्वीभिः। यातं। पथ्याभिः। अर्वाक्। स्वःऽविदा। वसुऽमता। रथेन। अवोः। वां। नू
नं। अश्विना। युवाकुः। हुवे। यत्। वां। सुते। माध्वी इति। वसुऽयुः। आ। वां। वहंतु। स्थविरासः। अश्वाः। पिबाथः। अस्मे इति। सुऽसुता। मधूनि। प्राचीं। ऊं इति। देवा। अश्विना। धियं। मे।
अमृध्रां। सातये। कृतं। वसुऽयुं। विश्वाः। अविष्टं। वाजे। आ। पुरंऽधीः। ता। नः। शक्तं। शचीपती इति शचीऽपती। शचीभिः॥ १२॥ ॥ अविष्टं। धीषु। अश्विना। नः। आसु। प्रजाऽ
वत्। रेतः। अह्रयं। नः। अस्तु। आ। वां। तोके। तनये। तूतुजानाः। सुऽरत्नासः। देवऽवीतिं। गमेम। एषः। स्यः। वां। पूर्वगत्वाऽइव। सख्ये। निऽधिः। हितः। माध्वी इति। रातः। अस्मे इति।
अहेळता। मनसा। आ। यातं। अर्वाक्। अश्नंता। हव्यं। मानुषीषु। विक्षु। एकस्मिन्। योगे। भुरणा। समाने। परि। वां। सप्त। स्रवतः। रथः। गात्। न। वायंति। सुऽभ्वः। देवऽयुक्ताः। ये। वां।
धूःऽसु। तरणयः। वहंति। असश्चता। मघवत्ऽभ्यः। हि। भूतं। ये। राया। मघऽदेयं। जुनंति। प्र। ये। बंधुं। सूनृताभिः। तिरंते। गव्या। पृंचंतः। अश्व्या। मघानि। नु। मे। हवं। आ। शृणुतं। यु
वाना। यासिष्टं। वर्तिः। अश्विनौ। इराऽवत्। धत्तं। रत्नानि। जरतं। च। सूरीन्॥ ०॥ १३॥ ॥ आ। शुभ्रा। यातं। अश्विना। सुऽअश्वा। गिरः। दस्रा। जुजुषाणा। युवाकोः। हव्यानि। च।
प्रतिऽभृता। वीतं। नः। प्र। वां। अंधांसि। मद्यानि। अस्थुः। अरं। गंतं। हविषः। वीतये। मे। तिरः। अर्यः। हवनानि। श्रुतं। नः। प्र। वां। रथः। मनःऽजवाः। इयर्ति। तिरः। रजांसि। अश्वि

पंचमाष्टकपद

३२

ना। शतऽऊतिः। अस्मभ्यं। सूरीवसू इति। सुऽयानः। अयं। ह। यत्। वां। देवऽया। ऊं इति। अद्रिः। ऊर्ध्वः। विवक्ति। सोमऽसुत्। युवऽयुः। आ। वल्गू इति। विप्रः। ववृतीत। हव्यैः। चित्रः। ह।
यत्। वां। भोजनं। नु। अस्ति। नि। अत्रये। महिष्वंतं। युयोतं। यः। वां। ओमानं। दधते। प्रियः। सन्॥ २४॥ ॥ उत। त्यत्। वां। जुरते। अश्विना। भूत्। च्यवानाय। प्रतीत्यं। हविःऽदे।
आधि। यत्। वर्पः। इतःऽऊति। धत्थः॥ उत। त्यं। भुज्युं। अश्विना। सखायः। मध्ये। जहुः। दुःऽएवासः। समुद्रे॥ निः। ईं। पर्षत्। अरावा। यः। युवाकुः॥ वृकाय। चित्। जसमानाय। शक्तं।
उत। शयवे। हूयमाना। यौ। अघ्न्यां। अपिन्वतं। अपः। न। स्तर्यं। चित्। शक्ती। अश्विना। शचीभिः॥ एषः। स्यः। कारुः। जरते। सुऽउक्तैः। अग्रे। बुधानः। उषसां। [illegible]। सु-
मन्मा। इषा। तं। वर्धत्। अघ्न्या। पयःऽभिः।०॥ २५॥ ॥ आ। वां। रथः। रोदसी इति। बद्बधानः। हिरण्ययः। वृषऽभिः। यातु। अश्वैः। घृतऽवर्तनिः। पविऽभिः। रुचानः। इषां। वोळ्हा।
नृऽपतिः। वाजिनीऽवान्॥ सः। पप्रथानः। अभि। पंच। भूम। त्रिऽवंधुरः। मनसा। आ। यातु। युक्तः॥ विशः। येन। गच्छथः। देवऽयंतीः। कुत्र। चित्। यामं। अश्विना। दधाना॥ सुऽअश्वा। य-
शसा। आ। यातं। अर्वाक्। दस्रा। निऽधिं। मधुऽमंतं। पिबाथः॥ वि। वां। रथः। वध्वा। यादमानः। अंतान्। दिवः। बाधते। वर्तनिऽभ्यां॥ युवोः। श्रियं। परि। योषा। अवृणीत। सूरः। दु-
हिता। परिऽतक्म्यायां॥ यत्। देवऽयंतं। अव[illegible]ः। शचीभिः। परि। घ्रंसं। ओमना। वां। वयः। गात्॥ यः। ह। स्यः। वां। रथिरा। वस्ते। उस्राः। रथः। युजानः। परिऽयाति। वर्तिः। तेन।
नः। शं। योः। उषसः। विऽउष्टौ। नि। अश्विना। वहतं। यज्ञे। अस्मिन्॥ नरा। गौराऽइव। विऽद्युतं। तृषाणा। अस्माकं। अद्य। सवना। उप। यातं॥ पुरुऽत्रा। हि। वां। मतिऽभिः। हवंते। मा।
वां। अन्ये। नि। यमन्। देवऽयंतः॥ युवं। भुज्युं। अवऽविद्धं। समुद्रे। उत्। ऊहथुः। अर्णसः। अस्त्रिधानैः॥ पतत्रिऽभिः। अश्रमैः। अव्यथिऽभिः। दंसनाभिः। अश्विना। पारयंता॥०॥ २६॥ पाव ३२

आ। विश्वऽवारा। अश्विना। गतं। नः। प्र। तत्। स्थानं। अवाचि। वां। पृथिव्यां॥ अश्वः। न। वाजी। शुनऽपृष्ठः। अस्थात्। आ। यत्। सेदथुः। ध्रुवसे। न। योनिं॥ सिसक्ति।
ता। वां। सुऽमतिः। चनिष्ठा। अतापि। घर्मः। मनुषः। दुरोणे॥ यः। वां। समुद्रान्। सरितः। पिपर्ति। एतऽग्वा। चित्। न। सुऽयुजा। युजानः॥ यानि। स्थानानि। अश्विना। द-
धाथे इति। दिवः। यह्वीषु। ओषधीषु। विक्षु॥ नि। पर्वतस्य। मूर्धनि। सदंता। इषं। जनाय। दाशुषे। वहंता॥ चनिष्टं। देवौ। ओषधीषु। अप्ऽसु। यत्। योग्याः। अश्नवैथे इति॥
ऋषीणां। पूर्वाणि। रत्नं। दधतौ। नि। अस्मे इति॥ अनु। पूर्वाणि। चख्यथुः। युगानि॥ शुश्रुऽवांसा। चित्। अश्विना। पुरूणि। अभि। ब्रह्माणि। चक्षाथे इति। ऋषीणां॥ प्रति। प्र।
यातं। वरं। आ। जनाय। अस्मे इति। वां। अस्तु। सुऽमतिः। चनिष्ठा॥ यः। वां। यज्ञः। नासत्या। हविष्मान्। कृतऽब्रह्मा। सऽमर्यः। भवाति॥ उप।०। वसिष्ठः। इमा। ब्रह्माणि। ऋच्यते। यु-
वऽभ्यां॥ इयं। मनीषा। इयं। अश्विना। गीः। इमां। सुऽवृक्तिं। वृषणा। जुषेथां॥ इमा। ब्रह्माणि। युवऽयूनि। अग्मन्॥०॥ २७॥ ॥ अप। स्वसुः। उषसः। नक्। जिहीते। रिणक्ति।
कृष्णीः। अरुषाय। पंथां॥ अश्वऽमघा। गोऽमघा। वां। हुवेम। दिवा। नक्तं। शरुं। अस्मत्। युयोतं॥ उप। आ। यातं। दाशुषे। मर्त्याय। रथेन। वामं। अश्विना। वहंता॥ युयुतं। अस्म-
त्। अनिरां। अमीवां। दिवा। नक्तं। माध्वी इति। त्रासीथां। नः॥ आ। वां। रथं। अवमस्यां। विऽउष्टौ। सुम्नऽयवः। वृषणः। वर्तयंतु॥ स्यूमऽगभस्तिं। ऋतयुक्ऽभिः। अश्वैः। आ। अश्वि-
ना। वसुऽमंतं। वहेथां॥ यः। वां। रथः। नृपती इति नृऽपती। अस्ति। वोळ्हा। त्रिऽवंधुरः। वसुऽमान्। उस्रऽयामा॥ आ। नः। एना। नासत्या। उप। यातं। अभि। यत्। वां। विश्वऽप्स्न्यः।
जिगाति॥ युवं। च्यवानं। जरसः। अमुमुक्तं।०। निः। अंहसः। तमसः। स्पर्तं। अत्रिं। नि। जाहुषं। शिथिरे। धातं। अंतरिति॥०॥ २८॥ ॥ आ। गोऽमता। नासत्या। रथेन। अश्वऽवता॥

पंचमाष्टक ३२ पुरुऽचंद्रेण। यातं। अभि। वां। विश्वाः। निःऽस्पृतः। सचंते। स्पार्हया। श्रिया। तन्वा। शुम्भाना॥ आ। नः। देवेभिः। उप। यातं। अर्वाक्। सऽजोषसा। नासत्या। रथेन। युवोः। हि। नः।
सख्या। पित्र्याणि। समानः। बंधुः। उत। तस्य। वित्तं॥ उत्। ऊं इति। स्तोमासः। अश्विनोः। अबुध्रन्। जामि। ब्रह्माणि। उषसः। च। देवीः। आऽविवासन्। रोदसी इति। धिष्ण्ये
इमे इति। अच्छ। विप्रः। नासत्या। विवक्ति॥ वि। च। इत्। उच्छंति। अश्विना। उषसः। प्र। वां। ब्रह्माणि। कारवः। भरंते।०। बृहत्। अग्नयः। सम्ऽइधा। जरंते॥ आ। पश्चातात्। नासत्या। आ।
पुरस्तात्। आ। अश्विना। यातं। अधरात्। उदक्तात्। आ। विश्वतः। पांचऽजन्येन। राया।०॥ १९॥ ॥०॥ स्तोमं। देवऽयंतः। दधानाः। पुरुऽदंसा। पुरुऽतमा। पुराऽजा। अमर्त्या। हवते।
अश्विना। गीः॥ नि। ऊं इति। प्रियः। मनुषः। सादि। होता। नासत्या। यः। यजते। वंदते। च। अश्नीतं। मध्वः। अश्विना। उपाके। आ। वां। वोचे। विदथेषु। प्रयस्वान्॥ अहेम। यज्ञं। पथां। उ-
राणाः। इमां। सुऽवृक्तिं। वृषणा। जुषेथां। श्रुष्टीवाऽइव। प्रऽइषितः। वां। अबोधि। प्रति। स्तोमैः। जरमाणः। वसिष्ठः॥ उप। त्या। वह्नी इति। गमतः। विशं। नः। रक्षःऽहना। संऽभृ-
ता। वीळुपाणी इति वीळुऽपाणी। सं। अंधांसि। अग्मत। मत्सराणि। मा। नः। मर्धिष्टं। आ। गतं। शिवेन।०॥ २०॥ ॥ दिविष्टयः। उस्रा। हवंते। अश्विना। अयं। वां।
अवसे अह्वे। शचीवसू इति शचीऽवसू। विशंऽविशं। हि। गच्छथः॥ युवं। चित्रं। ददथुः। भोजनं। नरा। चोदेथां। सूनृताऽवते। अर्वाक्। रथं। सऽमनसा। नि। यच्छतं।०॥ आ। यातं। उप। भूषतं।
मध्वः। पिबतं। अश्विना। दुग्धं। पयः। वृषणा। जेन्यावसू इति जेन्याऽवसू।०। अश्वासः। ये। वां। उप। दाशुषः। गृहं। युवां। दीयंति। बिभ्रतः। मक्षुयुऽभिः। नरा। हयेभिः। अश्विना। आ। दे-
वा। यातं। अस्मयू इत्यस्मऽयू। अध। ह। यंतः। अश्विना। पृक्षः। सचंत। सूरयः। ता। यंसतः। मघवत्ऽभ्यः। ध्रुवं। यशः। छर्दिः। अस्मभ्यं। नासत्या॥ प्र। ये। ययुः। अवृका- शिव ३३

सः। रथाःऽइव। नृऽपातारः। जनानां। उत। स्वेन। शवसा। शूशुवुः। नरः। उत। क्षियंति। सुऽक्षितिं॥ २१॥ ॥ वि। उषाः। आवः। दिविऽजाः। ऋतेन। आविःऽकृ-
ण्वाना। महिमानं। आ। अगात्। अप। द्रुहः। तमः। आवः। अजुष्टं। अंगिरःऽतमा। पथ्याः। अजीगरिति। महे। नः। अद्य। सुविताय। बोधि। उषः। महे। सौभगाय।
प्र। यंधि। चित्रं। रयिं। यशसं। धेहि। अस्मे इति। देवि। मर्तेषु। मानुषि। श्रवस्युं॥ एते। त्ये। भानवः। दर्शतायाः। चित्राः। उषसः। अमृतासः। आ। अगुः। जनयंतः। दैव्या-
नि। व्रतानि। आऽपृणंतः। अंतरिक्षा। वि। अस्थुः॥ एषा। स्या। युजाना। पराकात्। पंच। क्षितीः। परि। सद्यः। जिगाति। अभिऽपश्यंती। वयुना। जनानां। दिवः। दुहिता। भुवनस्य।
पत्नी॥ वाजिनीऽवती। सूर्यस्य। योषा। चित्रऽमघा। रायः। ईशे। वसूनां। ऋषिऽस्तुता। जरयंती। मघोनी। उषाः। उच्छति। वह्निऽभिः। गृणाना॥ प्रति। द्युतानां। अरुषासः।
अश्वाः। चित्राः। अदृश्रन्। उषसं। वहंतः। याति। शुभ्रा। विश्वऽपिशा। रथेन। दधाति। रत्नं। विधते। जनाय॥ सत्या। सत्येभिः। महती। महत्ऽभिः। देवी। देवेभिः। यजता।
यजत्रैः। रुजत्। दृळ्हानि। ददत्। उस्रियाणां। प्रति। गावः। उषसं। वावशंत॥ नु। नः। गोऽमत्। वीरऽवत्। धेहि। रत्नं। उषः। अश्वऽवत्। पुरुऽभोजः। अस्मे इति। मा। नः। बर्हिः।
पुरुऽषता। निदे। कः॥ २२॥ ॥ उत्। ऊं इति। ज्योतिः। अमृतं। विश्वऽजन्यं। विश्वानरः। सविता। देवः। अश्रेत्। क्रत्वा। देवानां। अजनिष्ट। चक्षुः। आविः। अकः। भुव-
नं। विश्वं। उषाः॥ प्र। मे। पंथाः। देवऽयानाः। अदृश्रन्। अमर्धंतः। वसुऽभिः। इष्कृतासः। अभूत्। ऊं इति। केतुः। उषसः। पुरस्तात्। प्रतीची। आ। अगात्। अधि।

पंचमाष्टके

हर्म्येभ्यः । तानि । इत् । अहानि । बहुलानि । आसन् । या । प्राचीनं । उत्ऽइता । सूर्यस्य । यतः । परि । जारःऽइव । आऽचरन्ती । उषः । ददृक्षे । न । पुनः । यतीऽइव । ते । इ
३४ त् । देवानां । सधऽमादः । आसन् । ऋतऽवानः । कवयः । पूर्व्यासः । गूळ्हं । ज्योतिः । पितरः । अनु । अविंदन् । सत्यऽमंत्राः । अजनयन् । उषसं । समाने । ऊर्वे । अधि । संऽगता
सः । सं । जानते । न । यतंते । मिथः । ते । ते । देवानां । न । मिनंति । व्रतानि । अमर्धंतः । वसुऽभिः । यादमानाः । प्रति । त्वा । स्तोमैः । ईळते । वसिष्ठाः । उषःऽबुधः । सुऽभगे । तुस्तु
वांसः । गवां । नेत्री । वाजऽपत्नी । नः । उच्छ । उषः । सुऽजाते । प्रथमा । जरस्व । एषा । नेत्री । राधसः । सूनृतानां । उषाः । उच्छंती । रिभ्यते । वसिष्ठैः । दीर्घऽश्रुतं । रयिं । अस्मे इति । द
धाना । ० ॥ २१ ॥ ॥ उपो इति । रुरुचे । युवतिः । न । योषा । विश्वं । जीवं । प्रऽसुवंती । चरायै । अभूत् । अग्निः । संऽइधे । मानुषाणां । अकः । ज्योतिः । बाधमाना । तमांसि । वि
श्वं । प्रतीची । सऽप्रथाः । उत् । अस्थात् । रुशत् । वासः । बिभ्रती । शुक्रं । अश्वैत् । हिरण्यऽवर्णा । सुदृशीकऽसंदृक् । गवां । माता । नेत्री । अह्नां । अरोचि । देवानां । चक्षुः । सुऽ
भगा । वहंती । श्वेतं । नयंती । सुऽदृशीकं । अश्वं । उषाः । अदर्शि । रश्मिऽभिः । विऽअक्ता । चित्रऽमघा । विश्वं । अनु । प्रऽभूता । अंतिऽवामा । दूरे । अमित्रं । उच्छ । उर्वीं । गव्यूतिं ।
अभयं । कृधि । नः । यवय । द्वेषः । आ । भर । वसूनि । चोदय । राधः । गृणते । मघोनि । अस्मे इति । श्रेष्ठेभिः । भानुऽभिः । वि । भाहि । उषः । देवि । प्रऽतिरंती । नः । आयुः । इ शिव
षं । च । नः । दधती । विश्वऽवारे । गोऽमत् । अश्वऽवत् । रथऽवत् । च । राधः । यां । त्वा । दिवः । दुहितः । वर्धयंति । उषः । सुऽजाते । मतिऽभिः । वसिष्ठाः । सा । अस्मासु । धाः । रयिं । ऋ ३४

४ विश्वौ॥

ष्वं । बृहंतं । ० ॥ २२ ॥ ॥ प्रति । केतवः । प्रथमाः । अदृश्रन् । ऊर्ध्वाः । अस्याः । अंजयः । वि । श्रयंते । उषः । अर्वाचा । बृहता । रथेन । ज्योतिष्मता । वामं । अस्मभ्यं । वक्षि । प्रति ।
सीं । अग्निः । जरते । संऽइद्धः । प्रति । विप्रासः । मतिऽभिः । गृणंतः । उषाः । याति । ज्योतिषा । बाधमाना । विश्वा । तमांसि । दुःऽइता । अप । देवी । ० । प्रति । अदृश्रन् । पुरस्तात् । ज्योतिः । य
च्छंतीः । उषसः । विऽभातीः । अजीजनन् । सूर्यं । यज्ञं । अग्निं । अपाचीनं । तमः । अगात् । अजुष्टं । अचेति । दिवः । दुहिता । मघोनी । विश्वे । पश्यंति । उषसं । विऽभातीं । ० । स्व
धया । युज्यमानं । आ । यं । अश्वासः । सुऽयुजः । वहंति । प्रति । त्वा । अद्य । सुऽमनसः । बुधंत । अस्माकासः । मघऽवानः । वयं । च । तिल्विलायध्वं । उषसः । विऽभातीः । ० ॥ २३ ॥ व
॥ पथ्या । जनानां । पंच । क्षितीः । मानुषीः । बोधयंती । सुसंदृक्ऽभिः । उक्षऽभिः । भानुं । अश्रेत् । वि । सूर्यः । रोदसी इति । चक्षसा । आवरित्यावः । वि । अंजते । दिवः । अंतेषु । अ
क्तून् । विशः । न । युक्ताः । उषसः । यतंते । सं । ते । गावः । तमः । आ । वर्तयंति । ज्योतिः । यच्छंति । सविताऽइव । बाहू इति । अभूत् । उषाः । इंद्रऽतमा । मघोनी । अजीजनत् । सुविताय ।
श्रवांसि । वि । दिवः । देवी । दुहिता । दधाति । अंगिरःऽतमा । सुऽकृते । वसूनि । तावत् । उषः । राधः । अस्मभ्यं । रास्व । यावत् । स्तोतृऽभ्यः । अरदः । गृणाना । यां । त्वा । जज्ञुः । वृ
षभस्य । रवेण । वि । दृळ्हस्य । दुरः । अद्रेः । और्णोः । देवंऽदेवं । राधसे । चोदयंती । अस्मद्र्यक् । सूनृताः । ईरयंती । विऽउच्छंती । नः । सनये । धियः । धाः । ० ॥ २४ ॥ ॥ प्रति । स्तोमेभिः ।
उषसं । वसिष्ठाः । गीःऽभिः । विप्रासः । प्रथमाः । अबुध्रन् । विऽवर्तयंती । रजसी इति । समंते इति संऽअंते । आविःऽकृण्वती । भुवनानि । विश्वा । एषा । स्या । नव्यं । आयुः ।

× सूर्यं॥२

पंचमा॰ष॰ दधाना। गूळ्ही। तमः। ज्योतिषा। उषाः। अबोधि। अग्रे। एति। युवतिः। अह्रयाणा। प्र। अचिकितत्। सूर्यं। यज्ञं। अग्निं॥ २॥ ८॥ ॥ प्रतिपंचमेषंचमनः ॥
३५ प्रति। ऊं इति। अदर्शि। आऽयती। उच्छंती। दुहिता। दिवः। अपो इति। महि। व्ययति। चक्षसे। तमः। ज्योतिः। कृणोति। सूनरी। उत्। उस्रियाः। सृजते। सूर्यः। सचा। उत्ऽयत्। नक्ष-
३ तने। त्रं। अर्चिऽवत्। तव। इत्। उषः। विऽउषि। सूर्यस्य। च। सं। भक्तेन। गमेमहि। प्रति। त्वा। दुहितः। दिवः। उषः। जीराः। अभुत्स्महि। या। वहसि। पुरु। स्पार्हं। वनन्ऽवति। रत्नं। न।
दाशुषे। मयः। उच्छंती। या। कृणोषि। मंहना। महि। प्रऽख्यै। देवि। स्वः। दृशे। तस्याः। ते। रत्नऽभाजः। ईमहे। वयं। स्याम। मातुः। न। सूनवः। तत्। चित्रं। राधः। आ। भर।
उषः। यत्। दीर्घश्रुत्ऽतमं। यत्। ते। दिवः। दुहितः। मर्तऽभोजनं। तत्। रास्व। भुनजामहै। श्रवः। सूरिऽभ्यः। अमृतं। वसुऽत्वनं। वाजान्। अस्मभ्यं। गोऽमतः। चोदयित्री।
मघोनः। सूनृताऽवती। उषाः। उच्छत्। अप। स्रिधः॥ ३॥ ॥ इंद्रावरुणा। युवं। अध्वराय। नः। विशे। जनाय। महि। शर्म। यच्छतं। दीर्घप्रऽयज्युं। अति। यः। वनुष्य-
ति। वयं। जयेम। पृतनासु। दुःऽध्यः। सम्ऽराट्। अन्यः। उच्यते। वां। महांतौ। इंद्रावरुणा। महावसू इति महाऽवसू। विश्वे। देवासः। परमे। विऽओमनि। सं। वां। ओजः।
वृषणा। सं। बलं। दधुः। अनु। अपां। खानि। अतृंतं। ओजसा। आ। सूर्यं। ऐरयतं। दिवि। प्रऽभुं। इंद्रावरुणा। मदे। अस्य। मायिनः। अपिन्वतं। अपितः।
पिन्वतं। धियः। युवां। इत्। युत्ऽसु। पृतनासु। वह्नयः। युवां। क्षेमस्य। प्रऽसवे। मितऽज्ञवः। ईशाना। वस्वः। उभयस्य। कारवः। इंद्रावरुणा। सुऽहवा। हवाम- षेव ३८

३ स्वऽराट्॥ अन्यः।

हे। इंद्रावरुणा। यत्। इमानि। चक्रथुः। विश्वा। जातानि। भुवनस्य। मज्मना। क्षेमेण। मित्रः। वरुणं। दुवस्यति। मरुत्ऽभिः। उग्रः। शुभं। अन्यः। ईयते॥ ४॥
महे। शुल्काय। वरुणस्य। नु। त्विषे। ओजः। मिमाते इति। ध्रुवं। अस्य। यत्। स्वं। अजामिं। अन्यः। श्नथयंतं। आ। अतिरत्। दभ्रेभिः। अन्यः। प्र। वृणो-
ति। भूयसः। न। दुःऽइतानि। मर्त्यं। इंद्रावरुणा। न। तपः। कुतः। चन। यस्य। देवा। गच्छथः। वीथः। अध्वरं। न। तं। मर्तस्य। नशते। परिऽह्वृतिः। अर्वाक्।
नरा। दैव्येन। अवसा। आ। गतं। शृणुतं। हवं। यदि। मे। जुजोषथः। युवोः। हि। सख्यं। उत। वा। यत्। आप्यं। मार्डीकं। इंद्रावरुणा। नि। यच्छतं। अ-
स्माकं। इंद्रावरुणा। भरेऽभरे। पुरःऽयोधा। भवतं। कृष्टिऽओजसा। यत्। वां। हवंते। उभये। अध। स्पृधि। नरः। तोकस्य। तनयस्य। सातिषु। अ-
स्मे इति। इंद्रः। वरुणः। मित्रः। अर्यमा। द्युम्नं। यच्छंतु। महि। शर्म। सऽप्रथः। अवध्रं। ज्योतिः। अदितेः। ऋतऽवृधः। देवस्य। श्लोकं। सवितुः।
मनामहे॥ ५॥ युवां। नरा। पश्यमानासः। आप्यं। प्राचा। गव्यंतः। पृथुऽपर्शवः। ययुः। दासा। च। वृत्रा। हतं। आर्याणि। च। सुऽदासं। इंद्रा-
वरुणा। अवसा। अवतं। यत्र। नरः। संऽअयंते। कृतऽध्वजः। यस्मिन्। आजा। भवति। किं। चन। प्रियं। यत्र। भयंते। भुवना। स्वःऽदृशः।
तत्र। नः। इंद्रावरुणा। अधि। वोचतं। सं। भूम्याः। अंताः। ध्वसिराः। अदृक्षत। इंद्रावरुणा। दिवि। घोषः। आ। अरुहत्। अस्थुः। जनानां। उप।
मां। अरातयः। अर्वाक्। अवसा। हवनऽश्रुता। आ। गतं। इंद्रावरुणा। वधनाभिः। अप्रति। भेदं। वन्वंता। प्र। सुऽदासं। आवतं। ब्रह्माणि। ए-

ऋ.पदं. वां। कृणुत। हवीमनि। सत्या। तृत्सूनां। अभवत्। पुरःऽहितिः। इंद्रावरुणा। अग्नि। आ। ततपंति। मा। अघानि। अर्यः। वनुषां। अरातयः। युवं। हि। व
३८ स्वः। उभयस्य। राजथः। अध। स्म। नः। अवतं। पार्ये। दिवि। ५ युवां। हवंते। उभयासः। आजिषु। इंद्रं। च। वस्वः। वरुणं। च। सातये। यत्र।
राजऽभिः। दशऽभिः। निऽबाधितं। प्र। सुऽदासं। आवतं। तृत्सुऽभिः। सह। दश। राजानः। संऽइताः। अयज्यवः। सुऽदासं। इंद्रावरुणा। न। यु
